# प्रश्न–पत्रस्य् अङ्कविभाजनपत्रम् (ब्लूप्रिंट)
## उच्चतरमाध्यमिकछात्राणां कृते

कक्षा – द्वादशी **(XII)** पूर्णाङ्काः – 100
विषय – संस्कृतम् (विशिष्टम्) समयः – घण्टात्रयम्

| स. क्र. | इकाई | इकाई–अनुसारेण आवंटिताङ्काः | अङ्कानुसारं प्रश्नानां सङ्ख्या | | | | | पूर्णप्रश्नाः |
|---|---|---|---|---|---|---|---|---|
| | | | 01 अङ्कः | 04 अङ्काः | 05 अङ्काः | 06 अङ्काः | 10 अङ्काः | |
| 01 | सन्धिः | 03 | 03 | – | – | – | – | 03 |
| 02 | समासः | 03 | 03 | – | – | – | – | 03 |
| 03 | अव्ययम् | 03 | 03 | – | – | – | – | 03 |
| 04 | धातुरूपाणि | 03 | 03 | – | – | – | – | 03 |
| 05 | शब्दरूपाणि | 03 | 03 | | | | | 03 |
| 06 | प्रत्ययः | 03 | 03 | – | – | – | – | 03 |
| 07 | पर्याय / विलोमचयनम् / विशेषण–विशेष्यम् | 05 | 05 | – | – | – | – | 05 |
| 08 | सूक्तिः | 02 | 02 | – | – | – | – | 02 |
| 09 | युग्ममेलनम् | 04 | – | 01 | – | – | – | 01 |
| 10 | एकपदेन प्रश्नोत्तराणि | 04 | – | 01 | – | – | – | 01 |
| 11 | एकवाक्येन प्रश्नोत्तराणि | 06 | – | – | – | 01 | – | 01 |
| 12 | कारकप्रयोगः | 05 | – | – | 01 | | | 01 |
| 13 | रिक्तस्थानपूर्तिः | 04 | – | 01 | – | – | – | 01 |
| 14 | सुभाषितम् | 04 | – | 01 | – | – | – | 01 |
| 15 | कथाक्रमसंयोजनम् / अनुच्छेदलेखनम् | 04 | – | 01 | – | – | – | 01 |
| 16 | रस–छन्द–अलङ्कारपरिचयः | 06 | – | – | – | 01 | – | 01 |
| 17 | संस्कृतसाहित्यपरिचयः / कविपरिचयः | 04 | – | 01 | – | – | – | 01 |
| 18 | गद्यम् | 08 | – | 02 | – | – | – | 02 |
| 19 | पद्यम् | 08 | – | 02 | – | – | – | 02 |
| 20 | अपठितांशः | 04 | | 01 | | | | 01 |
| 21 | पत्रम् | 04 | – | 01 | – | – | – | 01 |
| 22 | निबन्धलेखनम् | 10 | – | – | – | – | 01 | 01 |
| | **पूर्णयोगः** | **100** | **25** | **12** | **01** | **02** | **01** | **41** |

निर्देशः – प्रश्नपत्रे प्रायः विंशतिः प्रश्नाः भविष्यन्ति। प्रश्नेषु उपप्रश्नाः अपि विधेयाः।
पञ्चविंशतिः अङ्कानाम् वस्तुनिष्ठप्रश्नाः अनिवार्याः भविष्यन्ति।

## प्रादर्श–प्रश्नपत्रम्
## विषयः – संस्कृतम् (विशिष्टम्)
## कक्षा – द्वादशी (XII)

समय : घण्टात्रयम् पूर्णाङ्काः – 100

– **निर्देशः सर्वे प्रश्नाः अनिवार्याः।**

– **प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।**

**प्र. 1 उचितं विकल्पं चित्वा लिखत –** 1 x 6

(क) 'पश्यतीति' इत्यत्र सन्धिः अस्ति –
अ) गुणसन्धिः ब) दीर्घसन्धिः
स) यण्सन्धिः द) वृद्धिसन्धिः

(ख) 'सज्जनः' इत्यत्र सन्धिः अस्ति –
अ) व्यञ्जनसन्धिः ब) विसर्गसन्धिः
स) दीर्घसन्धिः द) यण्सन्धिः

(ग) 'भवन्त्यपेयाः' इत्यत्र सन्धिः अस्ति –
अ) गुणसन्धिः ब) दीर्घसन्धिः
स) वृद्धिसन्धिः द) यण्सन्धिः

(घ) 'कार्यसाधिका' इत्यत्र समासः अस्ति –
अ) बहुब्रीहिः ब) तत्पुरूषः
स) द्विगुः द) द्वन्द्वः

(ङ) 'सप्तर्षिः पदे समासः अस्ति –
अ) द्विगुः ब) द्वन्द्वः
स) तत्पुरूषः द) बहुब्रीहिः

(च) 'हर्षेण सहितम्' इत्यत्र समासः अस्ति –
अ) हर्षसहितम् ब) सहितहर्षम्
स) सहर्षम् द) सहितं हर्षम्

**प्र 2** (क) अधोलिखितेषु अव्ययम् अस्ति – 1 x 3
अ) छात्रः ब) युवकः
स) महेशः द) इति

(ख) 'बालकः मात्रा सह गच्छति' अस्मिन् वाक्ये अव्ययम् अस्ति –
अ) सह ब) गच्छति
स) बालकः द) मात्रा

(ग) 'अधोलिखितेषु' अव्ययम् नास्ति –
अ) अत्र ब) रामः
स) कदा द) तत्र

**प्र. 3** (क) **'सेवते' इत्यत्र लकारः अस्ति –** 1 x 6

अ) लोट्लकारः ब) लृट्लकारः

स) लङ्.लकारः द) लट्लकारः

(ख) 'सेविष्यते' इत्यत्र पुरूषः अस्ति –

अ) मध्यमपुरूषः ब) प्रथमपुरूषः

स) उत्तमपुरूषः द) कोऽपि नास्ति

(ग) 'सेवताम्' इत्यत्र लकारः अस्ति –

अ) लोट्लकारः ब) लट्लकारः

स) लङ्.लकारः द) लृट्लकारः

(घ) 'चन्द्रमसम्' इत्यत्र विभक्तिः अस्ति –

अ) चतुर्थी ब) तृतीया

स) प्रथमा द) द्वितीया

(ङ) 'राज्ञे' इत्यत्र विभक्तिः अस्ति –

अ) चतुर्थी ब) द्वितीया

स) तृतीया द) पञ्चमी

(च) 'सुधीः' इत्यस्य मूलशब्दः अस्ति –

अ) सु ब) धी

स) सुधा द) सुधी

**प्र. 4** (क) 'आदाय' इत्यत्र प्रत्ययः अस्ति – 1 x 3

अ) दा ब) ल्यप्

स) आद द) आ

(ख) 'हन्तव्यः इत्यत्र प्रत्ययः अस्ति –

अ) हन् ब) तव्यः

स) तव्यत् द) हन्तव्य

(ग) 'अधोलिखितेषु' तुमुन् प्रत्ययः अस्ति –

अ) गत्वा ब) परिशीलयितुम्

स) पठितवान् द) गतः

**प्र. 5** (क) एकः उपायः इत्यत्र विशेषणम् अस्ति – 1 x 5

अ) उपायः ब) एकः

(ख) 'उत्तमः सङ्कल्पः इत्यत्र विशेष्यम् अस्ति –

अ) सङ्कल्पः ब) उत्तमः

(ग) ''सुप्तम्' इत्यस्य विलोमशब्दः अस्ति –

अ) शयनम् ब) जागृतम्

स) जागरणम् द) जागरूकता

(घ) ''मृत्युः' इत्यस्य विलोमशब्दः अस्ति –

अ) जन्म  ब) मरणम्

स) जन्मम्  द) जनम

(ङ) ''राजा' इत्यस्य पर्यायशब्दः अस्ति –

अ) नरः  ब) नृपः

स) मानवः  द) नायकः

**प्र. 6 अनुद्योगेन तैलानि ........................ नाप्तुमर्हति** 1x2

क) अ) तिलेभ्यो  ब) यवेभ्यो

ख) स्वभावो यादृशो .................. न जहाति कदाचन

अ) कस्य  ब) यस्य

**प्र.7 युग्ममेलनं कुरूत –** 1x4

| | अ | | आ |
|---|---|---|---|
| क) | पूर्णमदः | – | दर्भैः |
| ख) | अर्द्धावलीढैः | – | विष्णुः |
| ग) | मृदुनि | – | पूर्णमिदम् |
| घ) | सुदर्शनचक्रम् | – | मृगशरीरे |

**प्र. 8 अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत –** 4

क) सर्वः कुत्र नन्दतु ?

ख) नचिकेता कति रात्रीः तत्र न्यवसत् ?

ग) ''अभिज्ञानशाकुन्तलम्'' कस्य कृतिः ?

घ) शास्त्रं सर्वस्य किं भवति ?

**प्र. 9 अधोलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत –** 6

क) दाने कीदृश्यः धेनवः आसन् ?

ख) अष्टावक्रं दृष्टवा सर्वे किं कृतवन्तः ?

ग) अनर्थाः केषु बहुलीभवन्ति ?

**प्र. 10 अधोलिखितगद्यांशौ पठित्वा प्रश्नानाम् उत्तराणि लिखत –** 2 x 4

क) तादृशीं सभां प्रवेष्टुम् अष्टावक्रः प्रायतत। परम् अष्टावक्राय अवकाशं कः प्रयच्छति? तस्य तत्र कोऽपि प्रशंसको अनुप्रेषको वा नास्ति। कोऽपि सहायः नास्ति। भगवानेव सहायः इति तस्य विश्वासः। भवगति यः विश्वसिति तस्य न कदापि कष्टं वा नष्टं वा भावति। प्रत्युत अभीष्टं सिध्यति।

क) भगवानेव सहायः इति कस्य विश्वासः ?

ख) तादृशीं सभां प्रवेष्टुं कः प्रायतत ?
ग) परम् कस्मै अवकाशं कः प्रयच्छति ?
घ) सिध्यति इत्यत्र कः लकारः ?

**ख)** पुरा भारतस्य सर्वभागेषु संस्कृतं राष्ट्रभाषा बभूव। इत्ययमेव सर्वभागेषु सर्वेषां विज्ञान–दर्शन–धर्माणां वेदोपनिषद्रामायणमहाभारतनाट्य–शास्त्रमहाकाव्यादीनां तेषां रचयितृणां च प्रभावोऽभवत् । रामकृष्ण–महावीर–गौतम–शङ्कराचार्यादीनां परिभ्रमणोपदेशभूमिः प्रायः भारते सवत्रैवासीत्। देशेऽस्मिन्नधुनापि प्रायः भारते सर्वत्रैव सामाजिकव्यवस्थैकरूपैव वर्तते।

क) देशे अधुना सामाजिकव्यवस्था कथमस्ति ?
ख) पुरा भारतस्य सर्वभागेषु किं राष्ट्रभाषा बभूव ?
ग) विज्ञान–दर्शन–धर्माणां प्रभावः कुत्र अभवत् ?
घ) केषां परिभ्रमणोपदेशभूमिः भारते सवत्रैवासीत् ?

**प्र. 11 अधोलिखितपद्यांशौ पठित्वा प्रश्नानाम् उत्तराणि लिखत –** 2 x 4

क) गुणा गुणज्ञेषु गुणा भवन्ति,
ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः।।

क) गुणाः कं प्राप्य दोषाः भवन्ति ?
ख) गुणाः केषु गुणाः भवन्ति ?
ग) नद्यः कीदृश्यः प्रवहन्ति ?
घ) नद्यः कम् आसाद्य अपेयाः भवन्ति ?

**ख)** कालः पचति भूतानि कालः संहरते प्रजाः।
कालः सुप्तेषु जागर्ति, कालो हि दुरतिक्रमः।।

क) कः संहरते प्रजाः ?
ख) कालः केषु जागर्ति ?
ग) कालः कानि पचति ?
घ) कः हि दुरतिक्रमः ?

**प्र. 12 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत – 4**

**प्र. 13 प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरूत –** **4**

(पृथिव्याम्, सर्ववेदसं, व, मानवः)

क) समानी ............. आकूतिः।
ख) वाजश्रवसः ..................... ददौ।
ग) मननात् ................ भवति।

घ) स्थितः ............................... इव मानदण्डः।

**प्र. 14 क) अधोलिखितेषु एकस्य साहित्यिकं परिचयं लिखत –** **2 x 2**

क) महाकाव्यम् ख) रामायणम् ग) महाभारतम्

**ख) अधोलिखितेषु एकस्य कवेः सङ्क्षिप्तपरिचयं लिखत –**

क) वेदव्यासः ख) कालिदासः ग) भासः

**प्र. 15 पञ्च–अशुद्धकारकवाक्यानां शुद्धिः करणीया –** **5**

क) दिनेशः महेशं सह गच्छति।

ख) सरस्वतीं नमः ।

ग) वृक्षस्य फलं पतति।

घ) गृहात् पुरतः देवालयः अस्ति।

ङ) राकेशः क्रिकेट्क्रीडायाः निपुणः अस्ति।

**प्र. 16 प्रदत्तैः शब्दैः अनुच्छेदलेखनं कुरूत –** **4**

(आधारोऽस्ति, पर्यावरणं, आक्सीजनवायुं, कार्बनडाईआक्साइडवायुं, स्वस्थं, वृक्षाः, कुर्वन्ति, वायुं, आक्सीजनवायुं)

स्वस्थं पर्यावरणम् अस्माकं जीवनस्य ............................................. । पर्यावरणस्य चाधाराः पुष्पिताः पल्लविताः ............................... भवन्ति। वृक्षाः ............ स्वस्थं कुर्वन्ति। ते मानवैः परित्यक्तान् वातावरणे च प्रसृतान् अन्यान् प्रदूषितान् वायून उदस्थान् .................। प्रत्येकं प्राणी श्वसनक्रियायां ............ गृह्णाति। कार्बनडाईआक्साइड ......... बहिः विसृजति। वृक्षाः च ............... गृह्णन्ति .............. च विसृजन्ति। अनेन पर्यावरणं .................... भवति।

**प्र. 17** क) श्रृड्गाररसस्य एकम् उदाहरणं लिखत – 2X3

ख) 'वसन्ततिलका' छन्दसः एकम् उदाहरणं लिखत –

ग) 'यमक' अलङ्कारस्य लक्षणम् उदाहरणं च लिखत –

**प्र. 18 अधोलिखित–अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –** 4

कुटिलाः जनाः स्वभावेन परेषाम् अहितम् इच्छन्ति। तेषां शक्तिः परेषां पीडनाय, बुद्धिः च परेषां वञ्चनाय भवति। तेषां मनसि अन्यत्, वचसि अन्यत्, कर्मणि च अन्यत् भवति। शान्तिवचनानि तान् सन्मार्गे आनेतुं न प्रभवन्ति। शुनः पुच्छः प्रयत्नेनापि कुटिलतां न त्यजति। दुग्धं पीत्वा अपि सर्पाः विषं न त्यजन्ति। कुटिलाः कुटिलतया एव सन्मार्गम् आश्रयन्ति।

(क) कीदृशाः जनाः कुटिलतया एव सन्मार्गम् आश्रयन्ति।

(ख) कुटिलानां शक्तिः किमर्थं भवति।

(ग) के दुग्धं पीत्वा अपि विषं न त्यजन्ति।

(घ) कीदृशानि वचनानि कुटिलान् सन्मार्गे आनेतुं न प्रभवन्ति।

**प्र. 19 भ्रमणार्थं गमनाय मित्रम् आह्वयितुम् मित्राय एकं पत्रं लिखत – 4**

**अथवा**

**अध्ययानस्य सूचनाविषये स्वस्य पित्रे एकं पत्रं लिखत –**

**प्र. 20 अधोलिखितेषु एकस्मिन् विषये शतशब्देषु निबन्धं लिखत – 10**

क) भारते नारीणां प्रतिष्ठा

ख) देशभक्तिः

ग) अनुशासनम्

घ) भारतीया संस्कृतिः

---

**प्रादर्श – उत्तरपत्रम्**
**विषय :– संस्कृतम् (विशिष्टम्)**
**कक्षा – द्वादशी (XII)**

समय :– घण्टात्रयम् पूर्णाङ्काः–100

---

**उत्तरम्–1**

(क) ब– दीर्घसन्धिः

(ख) अ – व्यञ्जनसन्धिः

(ग) द– यण्सन्धिः

(घ) ब– तत्पुरूषः

(ङ) अ– द्विगुः

(च) स– सहर्षम्

**उत्तरम् 2**

(क) द– इति

(ख) अ– सह

(ग) ब–रामः

**उत्तरम्–3**

(क) द–लट्लकारः

(ख) ब– प्रथमपुरूषः

(ग) अ– लोट्लकारः

(घ) द– द्वितीया

(ङ) अ– चतुर्थी

(च) द– सुधी

**उत्तर 4**

(क) ब–ल्यप्

(ख) स–तव्यत्

(ग) ब– परिशीलयितुम्

**उत्तरम् 5**

(क) ब– एकः

(ख) अ–सङ्कल्पः

(ग) ब– जागृतम्

(घ) अ– जन्म

(ङ) ब– नृपः

**उत्तरम् 6**

(क) अ– तिलेभ्यो

(ख) ब– यस्य

**उत्तरम् 7**

| | अ | आ |
|---|---|---|
| (क) | पूर्णमदः | पूर्णमिदम् |
| (ख) | अर्द्धावलीढैः | दर्भैः |
| (ग) | मृदुनि | मृगशरीरे |
| (घ) | सुदर्शनचक्रम् | विष्णुः |

**उत्तरम् –8**

(क) सर्वत्र

(ख) तिस्रः

(ग) कालिदासस्य

(घ) लोचनम्

**उत्तरम् 9**

(क) पीतोदकाः जग्धतृणाः दुग्धदोहाः निरिन्द्रियाः धेनवः दाने आसन्।

(ख) अष्टावक्रं दृष्ट्वा सर्वे उच्चैः हसितवन्तः

(ग) अनर्थाः छिद्रेषु बहुली भवन्ति।

**उत्तरम् 10**

**(क)** (क) भगवानेव सहायः इति अष्टावक्रस्य विश्वासः ।

(ख) तादृशीं सभां प्रवेष्टुम् अष्टावक्रः प्रायतत।

(ग) परम् अष्टावक्राय अवकाशं कः प्रयच्छति ।

(घ) 'सिध्यति' इत्यत्र लट्लकारः।

**(ख)** (क) देशे अधुना सामाजिकव्यवस्था एकरूपैव वर्तते।

(ख) पुरा भारतस्य सर्वभागेषु संस्कृतं राष्ट्रभाषा आसीत्।

(ग) विज्ञान–दर्शन– धर्माणां प्रभावः सर्वभागेषु अभवत्।

(घ) रामकृष्ण–महावीर–गौतम–शङ्कराचार्यादीनां परिभ्रमणोपदेशभूमिः प्रायः भारते सर्वत्रैवासीत्।

**उत्तर 11**

**(क)** (क) गुणाः निर्गुणं प्राप्य दोषाः भवन्ति।

(ख) गुणाः गुणज्ञेषु गुणाः भवन्ति।

(ग) नद्यः आस्वाद्यतोयाः प्रवहन्ति।

(घ) नद्यः समुद्रम् आसाद्य अपेयाः भवन्ति।

**(ख)** (क) कालः संहरते प्रजाः।

(ख) कालः सुप्तेषु जागर्ति।

(ग) कालः भूतानि पचति।

(घ) कालः हि दुरतिक्रमः।

**उत्तरम् 12 – प्रत्येकशुद्धसुभाषितस्य कृते अङ्कद्वयं निर्धारितम्।**

**उत्तरम् 13** (क) व

(ख) सर्ववेदसं

(ग) मानवः

(घ) पृथिव्याम्

**उत्तरम् 14** (क) शुद्धसाहित्यिकपरिचयस्य कृते अङ्कद्वयं निर्धारितम्।

(ख) कवेः शुद्धपरिचयस्य कृते अङ्कद्वयं निर्धारितम्।

**उत्तर 15** (क) दिनेशः महेशेन सह गच्छति।

(ख) सरस्वत्यै नमः।

(ग) वृक्षात् फलं पतति।

(घ) गृहस्य पुरतः देवालयः अस्ति।

(ङ.) राकेशः क्रिकेट्क्रीडायां निपुणः अस्ति।

**उत्तरम् 16** स्वस्थं पर्यावरणम् अस्माकं जीवनस्य आधारोऽस्ति। पर्यावरणस्य चाधाराः पुष्पिताः पल्लविताः वृक्षाः भवन्ति। वृक्षा पयावरणं स्वस्थं कुर्वन्ति। ते मानवैः परित्यक्तान् वातावरणे च प्रसृतान् अन्यान् प्रदूषितान् वायून् उदस्थान् कुर्वन्ति। प्रत्येकं प्राणी श्वसनक्रियायाम् आक्सीजनवायुं गृह्णाति। कार्बनडाईआक्साइडवायुं बहिः विसृजति। वृक्षाः च कार्बनडाईआक्साइडवायुं गृह्णन्ति आक्सीजनवायुं च विसृजन्ति। अनेन पर्यावरणं स्वस्थं भवति।

**उत्तरम् 17** (क) शुद्धोदाहरणस्य कृते अङ्कद्वयं निर्धारितम्।

(ख) छन्दसः शुद्धोदाहरणस्य कृते अङ्कद्वयं निर्धारितम्।

(ग) लक्षणस्य शुद्धोदाहरणस्य कृते च अङ्कद्वयं निर्धारितम्।

**उत्तरम् 18** (क) कुटिलाः जनाः कुटिलतया एव सन्मार्गम् आश्रयन्ति।

(ख) कुटिलानां शक्तिः परेषां पीडनाय भवति।

(ग) सर्पाः दुग्धं पीत्वा अपि विषं न त्यजन्ति।

(घ) शान्तिवचनानि कुटिलान् सन्मार्गे आनेतुं न प्रभवन्ति।

**उत्तरम् 19** पत्रे सङ्केतं सम्बोधनं दिनाङ्कादिकं च दृष्ट्वा शुद्धपत्रस्य कृते चत्वारः अङ्काः प्रदानीयाः।

**उत्तरम् 20** **सम्पूर्णशुद्धनिबन्धस्य कृते दश अङ्काः प्रदानीयाः।**

---